Reg. No. | | | | | | | | | |

BSCSKL 153/FNDSKL 153/BFTSKL 153/BSASKL 153/ BASSKL 153/BSWSKL 153

Credit Based II Semester B.Sc./B.Sc. (FND)/B.Sc. (A and VE)/B.Sc.(FT)/ B.A./B.S.W. Degree Examination, September 2022 (2018 – 19 and Earlier Batches) SAMSKRITH LANGUAGE

Time : 3 Hours Max. Marks : 80

सूचना : *1) **संस्कृत**भाषया **कर्णाटक**भाषया **आङ्ग्ल**भाषया वा उत्तराणि लिखत।*

*2) प्रश्नसङ्ख्या IV तथा V प्रश्नयो: **संस्कृते**नैव उत्तराणि लिखत।*

I. श्लोक**द्वयं** अनुवादं कृत्वा विवृणुत। **(2×5=10)**

1) यज्ञोत्सवे स्वपित्रा हठादनाकारिता सती गत्वा।
तनुमजहात् परिभूता क्वापि न गच्छेदनाहूत:।।

2) एकातपत्रं जगत: प्रभुत्वं नवं वय: कान्तमिदं वपुश्च।
अल्पस्य हेतो: बहु हातुमिच्छन् विचारमूढ: प्रतिभासि मे त्वम्।।

3) नान्ने तवेच्छा न च वाससीच्छा शय्यासु नेच्छा न च भूषणेच्छा।
परंत्ववश्यं बत वाञ्छसि त्वं निरन्तरं तत्कटिसूत्रमेकम्।।

II. **पञ्च**वाक्यानि सप्रसङ्गं विवृणुत। **(5×3=15)**

1) किं किं न साधयति कल्पलतेव विद्या।

2) रिपो: विपक्ष: सखा कार्य:।

3) प्रसादचिह्नानि पुर: फलानि।

4) व्याजहार महाघोरम् अभ्यागतमिवान्तकम्।

5) प्राणप्रयाणसमये मयि सन्निधत्ताम्।

6) स्वकोपशान्तिं ऋमशो लभन्ते।

7) फलार्थिनां किं न विषह्यमस्ति।

P.T.O.

III. **चतु:**प्रश्नान् प्रबन्धरूपेण उत्तरयत। **(4×8=32)**

1) सूक्तिमुक्तावलीनां मौलिकतां पाठ्योक्तदिशा विवृणुत।

2) दिलीपसिंहयो: संवादं सङ्गृह्णीत।

3) कैकेय्या: मनोरथान् पूरयितुं दशरथ: कथं यतते ? वर्णयत।

4) लीलाशुकोक्तदिशा श्रीकृष्णलीला: संक्षेपेण वर्णयत।

5) 'दुष्टदमनम्' – पाठस्य सारांशं लिखत।

6) 'संमार्जनीस्तुति:' – पाठस्य सारांशं लिखत।

IV. **द्वौ** संस्कृतेन टिप्पणीं लिखत। **(2×4=8)**

1) रामायणम्।

2) धेनुकदानव:।

3) सुभाषितानि।

4) दिलीप:।

V. निर्देशानुसारं **पञ्चदश**वाक्यानि पूरयत। **(15×1=15)**

अ) रेखाङ्कितानां कारकं सूचयत।

1) राम: तापस: भवतु। (कर्तृ, कर्म, करणम्)

2) रोगा: देहं प्रहरन्ति। (सम्प्रदानं, कर्म, करणम्)

3) मनसा मुकुन्दं स्मरामि। (कर्म, करणम्, सम्प्रदानम्)

4) भिन्नघटात् अम्ब: परिस्रवति। (अपादानम्, कर्म, करणम्)

5) वने सिंहा: सञ्चरन्ति। (सम्प्रदानम्, कर्म, अधिकरणम्)

आ) युक्तं समासनाम लिखत।

6) वज्रं पाणौ यस्य स:। (बहुव्रीहि:, द्विगु:, द्वन्द्व:)

7) चोरात् भयम्। (द्विगु:, बहुव्रीहि:, तत्पुरुष:)

8) महान् चासौ ऋषि: च। (द्विगु:, बहुव्रीहि:, कर्मधारय:)

9) त्रयाणां भुवनानां समाहार:। (बहुव्रीहि:, द्वन्द्व:, द्विगु:)

10) कृष्णस्य समीपम्। (बहुव्रीहि:, द्वन्द्व:, अव्ययीभाव:)

इ) युक्तकृदन्तं विलिख्य वाक्यं पूरयत।

11) कस्य ते प्रियं _____। (कार्यम्, कार्यौ, कार्ये)

12) मयि अन्तकः _____ न प्रभुः। (प्रहर्ता, प्रहर्त्रे, प्रहर्तुम्)

13) मणिहेतोः कृष्णः _____। (अभिशप्ता, अभिशप्तः, अभिशप्तम्)

14) मूढमतिः न _____। (उपदेष्टव्या, उपदेष्टव्यः, उपदेष्टव्यम्)

15) शास्त्राणि _____ अपि भवन्ति मूर्खः। (अधीत्य, अध्येतुम्, अध्येयम्)

ई) युक्तं तद्धितरूपं लिखत।

16) वसुदेवस्य अपत्यं पुमान् _____। (वसुदेवः, वासुदेवः, वसुदेवम्)

17) मूर्खस्य भावः _____। (मूर्खः, मूर्खम्, मूर्खता)

18) मम इदं _____। (मदीया, मदीयम्, मदीयः)

19) सुमित्रायाः अपत्यं पुमान् _____। (सुमित्रा, सौमित्रिः, सुमित्रम्)

20) रघोः अपत्यं पुमान् _____। (राघवः, रघुः, रघुणा)

_____